National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(67): 71-73
© 2026 NJHSR
www.sanskritarticle.com

**नम्रतादोरा**
शोधच्छात्रा, साहित्यविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालय,
तिरुपतिः (आन्ध्रप्रदेशः), 517507

**Correspondence:**
**नम्रतादोरा**
शोधच्छात्रा, साहित्यविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालय,
तिरुपतिः (आन्ध्रप्रदेशः), 517507

# डाँ.बुद्धेश्वरषडङ्गीविरचितस्य शतकत्रयस्य छन्दसां विवेचनम्

**नम्रतादोरा**

**परिमितिः-महाप्रसादशतकम्, शक्तिशतकम्, दक्षिणेश्वरीशतकम्**

**• डा.बुद्धेश्वरषडङ्गीमहोदयस्य सामान्य परिचयः-**

भारतीयाधुनिकेषु संस्कृतकविषु डा.बुद्धेश्वरषडङ्गीमहोदयः अन्यतमः वर्त्तते।उत्कलीयसारस्वत-साधकः कविरयं विविधाभिः काव्यकविताभिः संस्कृतसाहित्यं समृद्धं कृतवान्।कवेरस्य विविधेषु प्रकाशितेषु ग्रन्थेषु शान्तिदूतम्,ऋषिबोधनाटिका,तथापि बन्ध्या मम मातृभूमिरिति कथाकाव्यम्, महाप्रसादशतकम्, दक्षिणेश्वरीशतकम्, शक्तिशतकम्, उषासूक्तम्, मर्त्यवैकुण्ठ महाकाव्यम्, छन्दो-लंकारमञ्जरी, प्रार्थना, तुरीयावृत्तिविमर्शः, काव्यप्रकाशविमर्शः, साहित्यसुधा इति ग्रन्थाः अन्यतमाः वर्त्तन्ते।तस्य पितुः नाम बाणेश्वरः एवञ्च मातुः नाम लीलावती।अयं महोदयः सुन्दरगड मण्डलस्य वणाइगडजनपदे जन्मलाभं कृतवान्।

**कवेः शिक्षा-**

पितुरादेशेन राउरकेलायाम् विद्यमाने गुरुकूलाश्रमे पारम्परिक संस्कृतशिक्षां प्राप्तवान्। तत्र सः प्रथमश्रेण्यामेव उत्तीर्णोऽभवत्।माध्यमिक कक्षां यावदस्य गणितं प्रति अत्यधिका रुचिरासीदिति स्वयमेव स्वकीये जीवनपरिचये उल्लिखितवान्। श्यामसुन्दरमहाविद्यालये बर्षत्रयमधीत्य राज्यसर्वकारीयवृत्तिं, केन्द्रसर्वकारीयवृत्तिश्च प्राप्तवान्।1989 तमे बर्षे पुरीस्थ श्री जगन्नाथसंस्कृतविश्वविद्यालयं प्रति स्नातकोत्तरशिक्षानिमित्तम् गतवान्।पण्डित श्री भागवत प्रसाद त्रिपाठी महोदयस्य चरणकमले उषित्वा प्राचीनगुरुकुलशिक्षानुसारेण अलंकारशास्त्रमधीतवान्।प्रो.हरेकृष्णशतपथि महोदयानां प्रत्यक्ष तत्त्वा-वधाने अयं विद्याविरिध्युपाधिं लाभं कृतवान्।एवं रुपेण संस्कृतसाहित्यस्य वहुषु क्षेत्रेषु अयं स्व अमरलेखनीं चालनं कृतवान्।

**• छन्दसां परिचयः-**

छन्दनं छन्दः अथवा छन्द्यते अनेन इति छन्दः। चदि आह्लादने दीप्तौ च इति धातोः चन्देरादेश्च छः इति असुन् प्रत्यये छन्दः इति शब्दस्य व्युत्पत्तिः।

पुनः छद् धातोः चुरादिगणे घञ् प्रत्यये छन्दः शब्दः निष्पद्यते। अस्यार्थः आह्लादकत्वं आच्छादकत्वं वा। पाणिनीयशिक्षायां छन्दः पादौ तु वेदस्य इति वचनानुसारं छन्दः वेदपुरूषस्य पादत्वेन स्वीक्रियते। तदित्थम्-

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुः निरूक्तं श्रोत्रमुच्यते।।**[1]
**शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।**[2]

पादाभ्यां यथा प्राणीनाम् गतिर्भवति तथा छन्दोभिः मन्त्रात्मकस्य वेदस्वरूपस्य निर्मितिः प्रगतिश्च भवति। वैदिकछन्दसां ज्ञानं विना वेदमन्त्राणामध्ययनम् नैव कर्त्तव्यः। अमरकोषानुसारं **छन्दः पद्येऽभिलासे च**[3] इति ज्ञायते।छन्दशास्त्रस्य आदि प्रवर्त्तकः महर्षिपिङ्गलः। ततः देवेन्द्रः प्रभृतयः

शास्त्रमिदं ज्ञातवन्तः। छन्दः वेदस्य पादरूपमेवं भगवतः विष्णोः शिरोभूतमिति श्रीमद्भागवत महापुराणे वर्णितम्।

वैदिककालादेव छन्दसां प्रयोगपरम्परा परिदृश्यते। वैदिक-लौकिक शास्त्राणां सम्यक् उच्चारणार्थं तेषामर्थज्ञानाय च छन्दशास्त्रस्य ज्ञानमनिवार्यमेव। छन्दशास्त्रं काव्यवाङ्मयस्य प्राणसदृशं भवति। वेदेषु ऋचः सर्वेऽपि छन्दोबद्धाः एव। यो जनः छन्द-ऋषि-देवता-ब्राह्मणानां ज्ञानं विना वैदिकमन्त्रैः यज्ञं सम्पादयति,अध्यापयति वा सः पापी भवति। वेदोच्चारणसमये एकस्य पदस्य,अक्षरस्य,मात्रायाः वा लोपेन पापहेतुः भवति। छन्दोवद्धरचनासु अक्षरस्य अथवा मात्रायाः लोपं ज्ञातुम् अधिकः अवकाशः वर्त्तते। छन्दोज्ञानं विना वेदस्य अध्ययनम्,अध्यापनम्,यजनं,याजनं वा निषिद्धम् इति श्रुतिप्रसिद्धम्। वेदस्य विशुद्धं लययुक्तञ्च उच्चारणार्थं छन्दशास्त्रस्य अध्ययनमनिवार्यम् वर्त्तते। अनेन शास्त्रेण विना कस्यापि वैदिकमन्त्रस्य फलं नैवोपलभ्यते इति भारतीय प्राचीन आर्याणां विश्वासः।

वेदेषु गायत्री,त्रिष्टुप्,वृहती,उष्णिक्,जगती इत्यादिनी छन्दांसि मुख्यतया प्रयुक्तानि वर्त्तते। उक्तं च यजुर्वेदे-

**बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तु वा ।।**[4]

एवमेव ब्राह्मणग्रन्थेष्बपि छन्दसां विषये सूचितमस्ति। लौकिक काव्येषु अनुष्टुप्, इन्द्रवज्रा, उपेन्द्रवज्रा, वंशस्थ, मालिनी, शिखरिणी इत्यादिनी छन्दांसि व्यवहृतानि भवन्ति। लौकिकसंस्कृते आदिकवि-वाल्मीकिः एव सर्वादौ अनुष्टुप् छन्दसः प्रयोगं कृतवान्। आदिकवेः क्रोञ्चद्वन्द्व वियोगजनितः शोकः एव श्लोकत्वेन परिणतः। तद्यथा-

**मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।**[5]

**छन्दोलक्षणम्-**

आह्लादकरं पद्ये यत्र अक्षराणां मात्राणां वा प्रतिपादं गणना भवति तत्र छन्दः इति कथ्यते।

**छन्दोभेदाः-**

पद्यं चतुष्पदी भवति। अर्थात् एकस्मिन् पद्ये चत्वारि पदानि भवन्ति। तत् वृत्तं तथा जातिरिति द्विधा विभज्यते। वृत्तम् इत्यपि छन्दसः नामान्तरं भवति। केचित् जातिरिति अपि कथयन्ति। यत्र अक्षरगणना क्रियन्ते सः छन्दः वृत्तम् भवति एवं च यत्र मात्रागणना क्रियते सः जातिरिति कथ्यते। तद्यथा-

**पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा।**
**वृत्तमक्षरसंख्यातं जातिमात्राकृता भवेत्।।**[6]

तत्र सममर्धसमं विषमश्चेति वृत्तं त्रिधा भवन्ति। यदि चतुर्षु पादेषु अक्षरसंख्या तथा गणविचारः समानाः भवन्ति तर्हि तत् समवृत्तमिति कथ्यते। यत्र चतुर्षु पादेषु केऽपि द्वे द्वे पादे समाने भवतः तर्हि तत् वृत्तम् अर्धसमवृत्तमित्युच्यते। एवं च यत्र चतुर्षु पादेषु प्रतेकस्य पादस्य गणविचारे भिन्नता परिदृश्यते तर्हि तत् वृत्तम् विषमवृत्तमित्युच्यते। तद्यथोच्यते-

**सममर्धसमं वृत्तं विषमश्चेति तत् त्रिधा।**
**समं समचतुष्पादं भवत्यर्धसमं पुनः।।**
**आदिस्तृतीयवत् यस्य पादस्तुर्यो द्वितीयवत्।**
**भिन्नचिह्न चतुष्पादं विषमं परिकीर्त्तितम्।।**[7]

छन्दशास्त्रे अष्टौगणाः भवन्ति। तद्यथा-मगणः, नगणः, भगणः, यगणः, जगणः, रगणः, सगणः, तगणः इति। तद्यथा-

**मस्त्रिगुरूस्त्रिलघुश्च नकारोभादिगुरूः पुनरादिलघुर्यः।**
**जोगुरूमध्यगतो रलमध्यः सोऽतगुरूः कथितोऽन्तलघुः।।**[8]

अन्यत्रापि गणसंकेतस्य विवरणमुपलभ्यते। तद्यथा-

**आदिमध्यावसानेषु भ ज सा यान्ति गौरवम्।**
**य र ता लाघवं यान्ति मनौ तु गुरूलाघवम्।।**[9]

छन्दशास्त्रे “S”इति चिह्नस्य गुरूत्वेन व्यवहारः क्रियते तथा“। “ इति चिह्नस्य लघुत्वेन व्यवहारः सर्वजन विदितोऽस्ति। अधो विरचिते कोष्ठकेऽस्मिन् गणसंकेतः प्रदर्श्यते।

| मगणः | यगणः | रगणः | सगणः | तगणः | जगणः | भगणः | नगणः |
|---|---|---|---|---|---|---|---|
| SSS | ISS | SIS | IIS | SSI | ISI | SII | III |
| सर्वगुरूः | आदिलघुः | मध्यलघुः | अन्तगुरूः | अन्तलघुः | मध्यगुरूः | आदिगुरूः | सर्वलघुः |

एवं रूपेण छन्दशास्त्रे गणानां संकेतः निरूपितम्। पुनः ह्रस्व तथा दीर्घस्वरस्य निरूपणं कर्त्तुमाह-

**एकमात्रो भवेत् ह्रस्वो द्विमात्रो दीर्घ उच्यते।**
**त्रिमात्रस्तु प्लुतज्ञेयो व्यञ्जनञ्चार्धमात्रकम्।।**[10]
**सानुश्वारश्च दीर्धश्च विसर्गी च गुरूर्भवेत्।**
**वर्णः संयोग पूर्वश्च तथापादान्तगोऽपि वा।।**[11]

अर्थात् एकमात्राविशिष्टः वर्णः भवति ह्रस्वः अर्थात् लघुः,द्विमात्रा-विशिष्टः वर्णः भवति दीर्घः अर्थात् गुरूः। पुनः त्रिमात्राविशिष्टः वर्णः भवति प्लुतः तथा अर्धमात्रायुक्तवर्णः भवति व्यञ्जनवर्णः । पुनः कथितम्-

**संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसम्मिश्रम्।**
**विज्ञेयमक्षरं गुरू पादान्तस्थं विकल्पेन।।**[12]

अर्थात् संयुक्तवर्णस्य पूर्ववर्णः, दीर्घस्वरः, अनुस्वारः, तथा विसर्गान्तिवर्णाः गुरूसंज्ञकाः भवन्ति। पुनः पादस्यान्तिमवर्णः विकल्पेन गुरूसंज्ञकः भवति अर्थात् पादस्यान्तिमवर्णः विकल्पेन गुरूसंज्ञकः भवति अर्थात् आवश्यकतानुसारं पादान्तिमवर्णं गुरू-लघु कर्त्तुं शक्यते।

पुनः गुरू-लघु इत्यनयोः संकेतस्य प्रदर्शनं कर्त्तुम् कथ्यते-

**गुरूरेको गकारस्तु लकारो लघुरेककः।**
**क्रमेण चैषां रेखाभिः संस्थानं दर्श्यते यथा।।**[13]

अर्थात् ग कारः भवति गुरूः इत्यस्य प्रतीकः “S” ल कारः भवति लघुः इत्यस्य प्रतीकः “I” इति भवति।

काव्यपाठ समये आवश्यकतानुसारं विश्रामः स्वीक्रियते। विश्रामस्थलमेव यतिः इति कथ्यते। छन्दशास्त्रं ज्ञात्वा कवयः काव्यानि रचयन्ति। पाठकाः अपि छन्दशास्त्रस्य ज्ञानेन काव्यानां सहजतया अध्ययनं कृत्वा रसास्वादनं कुर्वन्ति।

**1)शिखरिणी-**

**लक्षणम्-रसै रूद्रैश्छिन्ना यमनसभलागः शिखरिणी।**[14]

**अर्थः**-यस्मिन् छन्दसि प्रतिचरणं क्रमेण यगणः, मगणः, नगणः, सगणः,भगणः, एकः लघुवर्णः तथा एकः गुरूवर्णश्चस्ति एवं च

प्रतिपादस्य षड्भिः तथा एकादशः अक्षरेषु यतिः भवति तत्र शिखरिणी छन्दः भवति।

**उदाहरणम्-**

**पराशक्तिः पायात् परहितकृतिप्रेमरसान्**
**सदा शास्त्रध्वान्तं हरति सततं याऽशिवहरा।**
**शिवाब्जोत्थश्रियैस्सुरनरमुनीन्द्रादिभिरहो**
**समेड्येयं नियं जगदवनधन्याऽक्षयपरा।।**[15]

**गणसंकेतः-**(ISS SSS III IIS SII I S)

**गणविचार**ः-(य, म, न, स, भ, ल, ग)

**समन्वयः-**अस्मिन् श्लोके गणविचारे क्रमानुसारं यगणः, मगणः, नगणः, सगणः,भगणः,एकः लघुवर्णः तथा एकः गुरूवर्णश्च विद्यन्ते एवं च प्रतिपादस्य षड्भिः तथा एकादशवर्णेषु यतिः भवति अतः अत्र शिखरिणी छन्दसः लक्षणं समन्वितं भवति।

**2) उपजातिः-**

**लक्षणम्-**

**अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातस्ताः।**
**इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम।।**[16]

**अर्थः**-इन्द्रवज्रा तथा उपेन्द्रवज्रा एतौ द्वौ छन्दौ यत्र सम्मिलितौ भवतः तत्र उपजाति छन्दः भवति। एवं रूपेण अन्ययोः द्वयोः छन्दद्वयस्य मिश्रिते सति उपजाति छन्दः भवति।

**उदाहरणम्-**

**इन्द्रवज्रा-उपेन्द्रवज्रा मिलनेन उपजातिः-**
**अर्कादिभिर्यो ग्रहराजराजः**
**संपूजितो नीलनगाधिवासः।**
**अपाणिपादोऽपि भबाब्धितापं**
**हन्तुं क्षमो यो वितनोतु भद्रम्।।**[17]

**समन्वयः**- अस्य श्लोकस्य द्वितीय-चतुर्थ पादयोः इन्द्रवज्रा (त त ज ग ग इति गणविचारानुसारं) तथा प्रथम-तृतीय पादयोः उपेन्द्रवज्रा छन्दसः (ज त ज ग ग इति गणविचारानुसारं )प्रयोगः दृश्यते। अतः अत्र द्वयोः छन्दद्वयस्य मिलनेन उपजाति छन्दः भवति।

**3)शार्दूलविक्रीडितम्-**

**लक्षणम्-सूर्याश्वैर्यदिमः सजौसततगाः शार्दूलविक्रीडितम्।**[18]

**अर्थः**-यत्र प्रत्येकस्मिन् पादे क्रमेण मगणः,सगणः,जगणः, सगणः, द्वौ तगणौ तथा एकः गुरूवर्णाश्च सन्ति एवं च प्रतिपादस्य द्वादशैः तथा सप्तभिः वर्णैः यतिः भवति तत्र शार्दुलविक्रीडितम् नाम्ना छन्दः भवति।

**उदाहरणम्-**

**कृष्णास्या कलिकालतापपरणे नित्योत्सुका याम्बिका**
**भक्तानन्दकरा नरस्मरहरा त्रैलोयपूज्या वरा।**
**दैत्यानन्दहरा बुधाशिवहरा रक्ताम्बरा भास्वरा**
**पायाद्विश्वजनार्तिदारणपरा गङ्गातटाधीस्वरी।।**[19]

**गणसंकेत**ः-(SSS IIS ISI IIS SSI SSI S )

**गणविचार**ः-(म, स, ज, स, त, त, ग)

**समन्वयः**-अस्मिन् श्लोके गणविचारे प्रत्येकेषु पादेषु क्रमशः मगणः,सगणः,जगणः,सगणः,द्वौ तगणौ तथा एकः गुरूवर्णश्च सन्ति एवं च प्रतिपादस्य द्वादशैः तथा सप्तभिः वर्णैः यतिः भवति अतः अत्र शार्दूलविक्रीडितम् छन्दः भवति।

एवं रुपेण शतकत्रयेषु डा.षडङ्गी महोदयेन विविधानां छन्दसां प्रयोगः कृतः वर्त्तते।वास्तविक रुपेण छन्दसः आस्वादन निमित्तम् कवेरस्य शतकत्रयस्याध्ययनं करणीयमिति सुष्ठु वक्तुं शक्यते।

**संकेताक्षरसूची-**

1) अमर.-अमरकोषः
2) पा.शि.-पाणिनीयशिक्षा
3)यजु.-यजुर्वेदः
4)वा.रा.(वाल)-वाल्मिकीरामायण वालकाण्डः
5)छ.म.-छन्दोमञ्जरी
6)श्रुत.-श्रुतवोधः
7)शक्ति.-शक्तिशतकम्
8)म.प्र.श.-महाप्रसादशतकम्
9)दक्षिण .-दक्षिणेश्वरीशतकम्

**सन्दर्भग्रन्थसूची-**

1)अमरकोषः-कह्नैयालालजोशी-चौखम्बा ओरियण्टालिया, दिल्ली, 2019
2)पाणिनीयशिक्षा- डा. राकेशशास्त्री- चौखम्बा ओरियण्टालिया, दिल्ली, 2020
3)यजुर्वेदः-स्वामी श्रीमद्दयानन्द सरस्वती, प्रकाशक—गोविन्द्रम् हसानन्दः
4)वाल्मिकीरामायणवालकाण्डः-गीताप्रेस्,गोरखपुरः, प्रथमसंस्करण, 2021
5)छन्दोमञ्जरी-डा.सुशान्तकुमार राज-साम्विदीप्रकाशनम्, पुरी
6)श्रुतवोधः-डा.राकेशशास्त्री, चौखम्बा संस्कृत सीरीज आफिस्, वाराणसी, 2012
7)शक्तिशतकम्-(मूलम्)डा.वुद्धेश्वर षडङ्गी
8)महाप्रसादशतकम्-(मूलम्) डा.वुद्धेश्वर षडङ्गी
9)दक्षिणेश्वरीशतकम्-(मूलम्) डा.वुद्धेश्वर षडङ्गी

**पाद टिप्पणी**

[1] पा.शि.-41
[2] पा.शि.-42
[3] अमर.-3/231
[4] यजुः-23/33
[5] वा.रा.(वाल)-2/15
[6] छ.म.-1/4
[7] तत्रैव-1/5,6
[8] तत्रैव-1/8
[9] श्रुत.-पृ-6
[10] छ.म.-1/10
[11] छ.म.-1/11
[12] श्रुत.-पृ-22
[13] छ.म.-1/9
[14] छ.म.पृ-184
[15] शक्ति.-1
[16] छ.म.पृ-89
[17] म.प्र.श-1
[18] छ.म.पृ-167
[19] दक्षिण.-1